श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथपादुकासहस्रम् ॥

## ॥ समर्पणपद्धतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ समर्पणपद्धतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

भजामः पादुके! याभ्यां भरतस्याग्रजस्तद।
प्रायः प्रतिप्रयाणाय प्रास्थानिकमकल्पयत्॥ १ ॥

राज्यां विहाय रघुवंशमहीपतीनां
पौरांश्च पादरसिकान् पृथिवीं च रक्ताम्।
त्वामेव हन्त चरणावनि! सम्प्रयास्यन्
आलम्बत प्रथममुत्तरकोसलेन्द्रः॥ २ ॥

प्राप्ते प्रयाणसमये मणिपादुके!
पौरान् अवेक्ष्य भवती करुणप्रलापान्।
मञ्जुप्रणादमुखरा विनिवर्तनार्थं
रामं पदग्रहणपूर्वमयाचतेव॥ ३ ॥

मत्वा तृणाय भरतो मणिपादुके!
रामेण तां विरहितां रघुराजधानीम्।
त्वामेव सप्रणयमुज्जयिनीमवन्तीं
मेने महोदयमयीं मधुरामयोध्याम्॥ ४ ॥

रामात्मनः प्रतिपदं मणिपादरक्षे!
विश्वम्भरस्य वहनेन परीक्षितां त्वाम्।
विश्वस्य देवि! वहने विनिवेशयिष्यन्
विस्रब्ध एव भरतो भवतीं ययाचे॥ ५ ॥

भक्त्या परं भवतु तद् भरतस्य साधोः
त्वत्प्रार्थनं रघुपतौ मणिपादरक्षे!।

केनाऽऽशयेन स मुनिः परमार्थदर्शी
भद्राय देवि! जगतां भवतीमवादीत्॥ ६ ॥

रामे वनं व्रजति पङ्क्तिरथे प्रसुप्ते
राज्यापवादचकिते भरते तदानीम्।
आश्वासयेत् क इव कोसलवासिनस्तान्
सीतेव चेत् त्वामपि साहसवृत्तिरासीः॥ ७ ॥

पादावनि! प्रभवतो जगतां त्रयाणां
रामादपि त्वमधिका नियतं प्रभवात्।
नो चेत् कथं नु भरतस्य तमेव लिप्सोः
प्रत्यायनं परिपणं भवती भवित्री॥ ८ ॥

मन्ये नियुज्य भवतीं मणिपादुके!
पार्ष्णिग्रहस्य भरतस्य निवारणार्थम्।
रत्नाकरं सपदि गोष्पदयन् विजिग्ये
रामः क्षणेन रजनीचरराजधानीम्॥ ९ ॥

पादावनि! प्रभुतरान् अपराधवर्गान्
सोढुं क्षमा त्वमसि मूर्तिमती क्षमैव।
यत् त्वां विहाय निहताः परिपन्थिनस्ते
देवेन दाशरथिना दशकण्ठमुख्याः॥ १० ॥

वाक्ये गरीयसि पितुर्विहितेऽप्यतृप्त्या
मातुर्मनोरथमशेषमवन्ध्ययिष्यन्।
मन्ये तदा रघुपतिर्भरतस्य तेने
मातस्त्वयैव मणिमौलिनिवेशलक्ष्मीम्॥ ११ ॥

पादाम्बुजात् विगलितां परमस्य पुंस
त्वामादरेण विनिवेश्य जटाकलापे।
अङ्गीचकार भरतो मणिपादुके!
गङ्गाधिरूढशिरसो गिरिशस्य कान्तिम्॥ १२ ॥

अविकलमधिकर्तुं रक्षणे सप्तलोक्या
रघुपतिचरणेन न्यस्तदिव्यानुभावाम्।
अभजत भरतस्त्वामञ्जसा पादरक्षे!
मणिमकुटनिवेशत्यागधन्येन मूर्ध्ना॥ १३ ॥

इयमविकलयोगक्षेमसिद्ध्यै प्रजानामलमिति
भरतेन प्रार्थितामादरेण।
रघुपतिरधिरोहन् अभ्यषिञ्चत स्वयं त्वां
चरणनखमणीनां चन्द्रिकानिर्झरेण॥ १४ ॥

प्रणयिनि पदपद्मे गाढमाश्लिष्यति त्वां
विधिसुतकथिरं तद्वैभवं ते विदन्तः।
अनुदिनमृषयस्त्वामर्चयन्त्यग्न्यगारे
रघुपतिपदरक्षे! रामगिर्याश्रमस्थाः॥ १५ ॥

नियतमधिरुरोह त्वामनधेयशक्तिं
निजचरणसरोजे शक्तिमाधातुकामः।
स कथमितरथ त्वां न्यस्य रामो विजह्रे
दृषदुपचितभूमौ दण्डकारण्यभागे॥ १६ ॥

रघुपतिपदपद्माद्रत्नपीठे निवेष्टुं
भरतशिरसि लग्नां प्रेक्ष्य पादावनि! त्वाम्।
परिणतपुरुषार्थः पौरवर्गः स्वयं ते
विधिमभजत सर्वो वन्दिवैतालिकानाम्॥ १७ ॥

अनन्यराजन्यनिदेशनिष्ठां चकार पृथ्वीं चतुर्णवान्ताम्।
भ्रातुर्यियासोर्भरतस्तदा त्वां मूर्ध्ना वहन् मूर्तिमतीमिवाज्ञाम्॥ १८ ॥

यद् भ्रात्रे भरताय रङ्गपतिना रामत्वमातस्थुषा
नित्योपास्यनिजाङ्घ्रिनिष्क्रयतया निश्चित्य विश्राणितम्।
योगक्षेमवहं समस्तजगतां यद्गीयते योगिभिः
पादत्राणमिदं मितम्पचकथामह्नाय मे निह्नुताम्॥ १९ ॥

भरतस्येव ममापि प्रशमितविश्वापवाददुर्जाता।
शेषेव शिरसि नित्यं विहरतु रघुवीरपादुके! भवती॥ २० ॥

॥ इति पादुकासहस्रे समर्पणपद्धतिः चतुर्थी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥